# tulasIpUja 1

# તુલસીપૂજા ૧

## Document Information

Text title : tulasii puujaa

File name : tulasipujaa.itx

Category : pUjA, devii, tulasI, devI

Location : doc_devii

Author : shiva

Transliterated by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Proofread by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Latest update : August 25, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

tulasIpUja 1

# તુલસીપૂજા ૧

॥ અથ તુલસી પૂજા પ્રારંભઃ ॥

॥ શ્રીગણેશાય નમઃ ॥

॥ અથ તુલસીપૂજનં લિખ્યતે ॥

શ્રીમહાદેવ ઉવાચ ॥

શુભે પક્ષે શુભે વારે શુભે ઋક્ષે શુભોદયે ।

કેશવાર્થે શુભાંશે ચ રોપયેત્તુલસીં મુનિઃ ॥ ૧॥

ગૃહસ્થો ગૃહમધ્યે વા ગૃહસ્થોપવનેપિ વા ।

શુચૌ દેશે તુ તુલસીમર્ચ્ચયેદ્બુદ્ધિમાન્નરઃ ॥ ૨॥

મૂલે ચ વેદિકાં કૃત્વા આલવાલસમન્વિતામ્ ।

પ્રાતઃસંધ્યાવિધિં કૃત્વા સ્નાનપૂર્વં દિને દિને ॥ ૩॥

ગાયત્ર્યષ્ટજપં કૃત્વા તુલસીં પૂજયેત્તતઃ ।

પ્રાઙ્મુખોદઙ્મુખો વાપિ સ્થિત્વા પ્રયતમાનસઃ ॥ ૪॥

ધ્યાયેચ્ચ તુલસીં દેવીં શ્યામાં કમલલોચનામ્

પ્રસન્નપદ્મકલ્હારવરાભયચતુર્ભુજામ્ ॥ ૫॥

કિરીટહારકેયૂરકુંડલાદિવિભૂષિતામ્ ।

ધવલાંશુકસંયુક્તાં પદ્માસનનિષેદુષીમ્ ॥ ૬॥ ઇતિ ધ્યાનમ્ ॥

દેવિ ત્રૈલોક્યજનનિ સર્વલોકૈકપાવનિ ।

આગચ્છ ભગવત્યત્ર પ્રસીદ તુલસિ દ્રુતમ્ ॥ ૭॥ આવાહનમ્ ॥

સર્વ દેવમયે દેવિ સર્વદા વિષ્ણુવલ્લભે ।

રત્નસ્વર્ણમયં દિવ્યં ગૃહાણાસનમવ્યયે ॥ ૮॥ આસનમ્ ॥

સર્વદેવમયાકારે સર્વદેવનમોઽસ્તુતે ।

પાદ્યં ગૃહાણ દેવેશિ તુલસિ ત્વં પ્રસીદ મે ॥ ૯॥ પાદ્યમ્ ॥

સર્વ દેવમયાકારે સર્વાંગમણિશોભિતે ।

ઇદમર્ઘંગૃહાનત્વં દેવિ દૈત્યાંન્તકપ્રિયે ॥ ૧૦॥ અર્ઘ્યમ્ ॥

સર્વલોકસ્ય રક્ષાર્થં સદા સંનિધિકારરિણિ ॥

ગૃહાણ તુલસિ પ્રીત્યા ઇદમાચમનીયકં ॥ ૧૧॥ આચમનમ્ ॥
ગંગાદિભ્યો નદીભ્યશ્ચ સમાનીતમિદં જલમ્ ।
સ્નાનાર્થં તુલસિ સ્વચ્છં પ્રીત્યા તત્પ્રતિગૃહ્યતામ્ ॥ ૧૨॥ સ્નાનમ્ ॥
ક્ષિરોદમથનોદ્ભૂતે ચંદ્રલક્ષ્મીસહોદરે ।
ગૃહ્યતાં પરિધાનાર્થમિદં ક્ષૌમાંબરં શુભે ॥ ૧૩॥ વસ્ત્રમ્ ॥
શ્રીગંધં કુંકુમં દિવ્યં કર્પૂરાગરુસંયુતમ્ ।
કલ્પિતં તે મહાદેવિ પ્રીત્યર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૪॥ ગંધમ્ ॥
નીલોત્પલં તુ કલ્હારમાલત્યાદીનિ શોભને ।
પદ્માદિગંધવંતીનિ પુષ્પાણિ પ્રતિગૃહ્યતામ્ ॥ ૧૫॥ પુષ્પમ્ ॥
ધૂપં ગૃહાણ્ દેવેશિ મનોહારિ સગુગ્ગલમ્ ।
આજ્યમિસ્રં તુ તુલસિ ભક્તાભિષ્ટપ્રદાયિનિ ॥ ૧૬॥ ધૂપમ્ ॥
અજ્ઞાનતિમિરાંધસ્ય જ્ઞાનદીપપ્રદાયિની ।
ત્વયા તુ તુલસિ પ્રિતા દીપોયં પ્રતિગૃહ્યતામ્ ॥ ૧૭॥ દીપમ્ ।
નમસ્તે જગતાં નાથે પ્રાણિનાં પ્રિયદર્શને ।
યથાશક્તિ મયા દત્તં નૈવેદ્યમ્ પ્રતિગૃહ્યતામ્ ॥ ૧૮॥ નૈવેદ્યમ્ ॥
નમો ભગવતે શ્રેષ્ઠે નારયનજગન્મયે ।
તુલસિ ત્વરયા દેવિ પાનીયં પ્રતિગૃહ્યતામ્ ॥ ૧૯॥ પાનીયમ્ ॥
અમૃતેમૃતસંભૂતે તુલસ્યમૃતરૂપિણિ ।
કર્પૂરાદિસમાયુક્તં તાંબૂલં પ્રતિગૃહ્યતામ્ ॥ ૨૦॥ તાંબૂલમ્ ॥
દક્ષિણા દક્ષિણકરે ત્વદ્ભક્તાનાં પ્રિયંકરિ ।
કરોમિ તે સદા ભક્ત્યા વિષ્ણુકાંતે પ્રદક્ષિણામ્ ॥ ૨૧॥
નમો નમો જગદ્ધાત્રૈ જગદાદ્યૈ નમો નમઃ ।
નમો નમો જગદ્ભૂત્યૈ નમસ્તે પરમેશ્વરિ ॥ ૨૨॥
પ્રસીદ મમ દેવેશિ કૃપયા પરયા સદા ।
અભિષ્ટફલસિદ્ધ્યર્થં કુરુ મે માધવપ્રિયે ॥ ૨૩॥
ઇત્યેવમર્ચ્યયેન્નિત્યં પ્રાતરેવ શુચિર્નરઃ ।
મધ્યાહ્ને વાથ સાયાહ્ને પૂજયેત્પ્રયતો નરઃ ॥ ૨૪॥

॥ ઇતિ તુલસીપૂજાસમ્પૂર્ણા ॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

*tulasIpUja 1*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*